श्री वेंकटेश अष्टकं

श्री वेंकटेश अष्टकं

वेंकटेशो वासुदेवः प्रद्युम्नोऽमितविक्रमः |
संकर्षणोऽनिरुद्धश्च शेषाद्रिपतिरेव च || 1 ||

जनार्दनः पद्मनाभो वेंकटाचलवासिनः |
सृष्टिकर्ता जगन्नाथो माधवो भक्तवत्सलः || 2 ||

गोविंदो गोपतिः कृष्णः केशवो गरुडध्वजः |
वराहो वामनश्चैव नारायण अधोक्षजः || 3 ||

श्रीधरः पुंडरीकाक्षः सर्वदेवस्तुतो हरिः |
श्रीनृसिंहो महासिंहः सूत्राकारः पुरातनः || 4 ||

रमानाथो महीभर्ता भूधरः पुरुषोत्तमः |
चोळपुत्रप्रियः शांतो ब्रह्मादीनां वरप्रदः || 5 ||

श्रीनिधिः सर्वभूतानां भयकृद्भयनाशनः |
श्रीरामो रामभद्रश्च भवबंधैकमोचकः || 6 ||

भूतावासो गिरिवासः श्रीनिवासः श्रियः पतिः |
अच्युतानंत गोविंदो विष्णुर्वेंकटनायकः || 7 ||

सर्वदेवैकशरणं सर्वदेवैकदैवतं |
समस्तदेवकवचं सर्वदेवशिखामणिः || 8 ||

इतीदं कीर्तितं यस्य विष्णोरमिततेजसः |
त्रिकाले यः पठेन्नित्यं पापं तस्य न विद्यते || 9 ||

राजद्वारे पठेद्घोरे संग्रामे रिपुसंकटे |
भूतसर्पपिशाचादिभयं नास्ति कदाचन || 10 ||

अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत् |
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् || 11 ||

यद्यदिष्टतमं लोके तत्तत्प्राप्नोत्यसंशयः |
ऐश्वर्यं राजसम्मानं भुक्तिमुक्तिफलप्रदं || 12 ||

विष्णोर्लोकैकसोपानं सर्वदुःखैकनाशनं |
सर्वैश्वर्यप्रदं नृणां सर्वमंगळकारकं || 13 ||

मायावी परमानंदं त्यक्त्वा वैकुंठमुत्तमं |
स्वामिपुष्करिणीतीरे रमया सह मोदते || 14 ||

कळ्याणाद्भुतगात्राय कामितार्थप्रदायिने |
श्रीमद्वेंकटनाथाय श्रीनिवासाय ते नमः || 15 ||

इति श्री ब्रह्मांडपुराणे ब्रह्मनारदसंवादे वेंकटगिरिमाहात्म्ये श्री वेंकटेश अष्टकं |